# Gopibhih Kritam Shri Krishnaraksha Stotram

# ગોપીભિઃ કૃતં શ્રીકૃષ્ણરક્ષાસ્તોત્રમ્

## Document Information

Text title : Gopibhih Kritam Shri Krishnaraksha Stotram

File name : gopIbhiHkRRitaMshrIkRRiShNarakShAstotram.itx

Category : vishhnu, vishnu, bhAgavatapurANa, raksha, stotra, krishna

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 10/6/22-29||

Latest update : October 1, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 3, 2025

*sanskritdocuments.org*

# ગોપીભિઃ કૃતં શ્રીકૃષ્ણરક્ષાસ્તોત્રમ્

અવ્યાદજોઽઙ્ઘ્રિમણિમાંસ્તવ જાન્વથોરૂ
યજ્ઞોઽચ્યુતઃ કટિતટં જઠરં હયાસ્યઃ ।
હૃત્કેશવસ્ત્વદુર ઈશ ઇનસ્તુ કણ્ઠં
વિષ્ણુર્ભુજં મુખમુરુક્રમ ઈશ્વરઃ કમ્ ॥ ૨૨॥

ચક્ર્યગ્રતઃ સહગદો હરિરસ્તુ પશ્ચાત્
ત્વત્પાર્શ્વયોર્ધનુરસી મધુહાજનશ્ચ ।
કોણેષુ શઙ્ખ ઉરુગાય ઉપર્યુપેન્દ્ર-
સ્તાર્ક્ષ્યઃ ક્ષિતૌ હલધરઃ પુરુષઃ સમન્તાત્ ॥ ૨૩॥

ઇન્દ્રિયાણિ હૃષીકેશઃ પ્રાણાન્ નારાયણોઽવતુ ।
શ્વેતદ્વીપપતિશ્ચિત્તં મનો યોગેશ્વરોઽવતુ ॥ ૨૪॥

પૃશ્નિગર્ભસ્તુ તે બુદ્ધિમાત્માનં ભગવાન્ પરઃ ।
ક્રીડન્તં પાતુ ગોવિન્દઃ શયાનં પાતુ માધવઃ ॥ ૨૫॥

વ્રજન્તમવ્યાદ્વૈકુણ્ઠ આસીનં ત્વાં શ્રિયઃપતિઃ ।
ભુઞ્જાનં યજ્ઞભુક્પાતુ સર્વગ્રહભયઙ્કરઃ ॥ ૨૬॥

ડાકિન્યો યાતુધાન્યશ્ચ કૂષ્માણ્ડા યેઽર્ભકગ્રહાઃ ।
ભૂતપ્રેતપિશાચાશ્ચ યક્ષરક્ષોવિનાયકાઃ ॥ ૨૭॥

કોટરા રેવતી જ્યેષ્ઠા પૂતના માતૃકાદયઃ ।
ઉન્માદા યે હ્યપસ્મારા દેહપ્રાણેન્દ્રિયદ્રુહઃ ॥ ૨૮॥

સ્વપ્નદૃષ્ટા મહોત્પાતા વૃદ્ધબાલગ્રહાશ્ચ યે ।
સર્વે નશ્યન્તુ તે વિષ્ણોર્નામગ્રહણભીરવઃ ॥ ૨૯॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે દશમસ્કન્ધે પૂર્વાર્ધે તૃતીયાધ્યાયાન્તર્ગતં
ગોપીભિઃ કૃતં શ્રીકૃષ્ણરક્ષાસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૧૦/૬/૨૨-૨૯ ॥

bhAgavatapurANa . adhyAya 10/6/22-29..

Proofread by PSA Easwaran

---

*Gopibhih Kritam Shri Krishnaraksha Stotram*

pdf was typeset on October 3, 2025

Please send corrections to *sanskrit@cheerful.com*